वृद्धिरिति तस्य तथात्वम् । समखण्डवाचित्वे तु न० । "अर्द्धं नपुंसकम्" पा० सूत्रे तथैवोक्तेः । ५समीपे अर्धदेव-शब्दे उदा० समांसवाचिनस्तु एकदेशिसमासः । अर्धर्चः अर्धकायम् अर्धपिप्पली क्वचित् षष्ठीसमासः "एतच्छ्रुता-र्द्धमावृत्त्य त्रैलोक्यविजयी भवेत्" तन्त्रम् । एतत् पूर्व्वकनौशब्दान्ततत्पुरुषात् अच् अर्धनावम् खार्य्यास्तु वा अर्धखारम् अर्धखारी । खण्डमात्रवाचित्वे षष्ठी-समासः । "क्रोशार्धं प्रकृतिपुरस्सरेण गत्वा" रघुः । अवयवावयविनोर्भेदात् क्वचित् धर्म्मिपरता । अर्ध्यते वर्ध्यते ऋध्–णिच्–कर्म्मणि अच् । ६ खण्डिते त्रि० जसि अर्धाः अर्धे । [क्रियासमाप्तिस्ततोऽर्द्धे कृते ।

**अर्द्धकृत** त्रि० अर्धं कृतम् । असम्पूर्णकृते यस्य यथा करणे

**अ(आ)र्धकौडविक** त्रि० अर्धकुडवपरिमाणमर्हति ठञ् उत्तर पदस्य वृद्धिःपूर्वस्य वा। अर्धकुडवपरिमाणार्हे स्त्रियां ङीप्।

**अर्द्धखारी** स्त्री अर्धं खार्य्याः एक०त० वा अच् । खारीपरि माणार्धांशे। अत्र वा अच् । अर्धखारम् तत्रैव न० ।

**अर्द्धगङ्गा** स्त्री अर्द्धं गङ्गायाः एकदेशित०। स्नानादौ गङ्गास्ना-नादेरर्द्धफलदायिन्यां कावेरीनद्याम् ।

**अर्द्धगर्भ** त्रि०अर्द्धे वत्सरस्यार्द्धे मार्गादौ पौषादौ वाब्रह्माण्डस्यार्धे गगने वा गर्भं गर्भस्थानीयमुदकं यस्य । सूर्य्यरश्मिभेदे ते हि मार्गादौ पौषादौ च भूमिस्थम् उदकमाकृष्य गर्भरूपेण गगने धारयन्ति इति ज्योतिषप्रसिद्धम् "तासां शतानि चत्वारि रश्मीनां वृष्टिसर्जने इत्यादिना २२४ पृष्ठ दर्शितेन यादववाक्येन तेषां मध्ये शतत्रयेण गर्भधारण स्योक्तेस्तथात्वम् गर्भधारणकालश्च वृ० स० उक्तम् यथा । "मार्गशिरःशुक्लपक्षप्रतिपत्प्रभृति क्षपाकरेऽषाढाम् । पूर्वां वा समुपगते गर्भाणां लक्षणं ज्ञेयम् । यन्नक्षत्रमुपगते गर्भ श्चन्द्रे भवेत् स चन्द्रवशात् । पञ्चनवते दिनशते तत्रैव प्रसवमायाति । सितपक्षभवाः कृष्णे, शुक्ले कृष्णा द्युस-म्भवाः रात्रौ । नक्तंप्रभवाश्चाहनि, सन्ध्याजाताश्च सन्ध्या-याम् । मार्गशीर्षाद्यागर्भामन्दफलाः पौषशुक्लजाताश्च । पौषस्य कृष्णपक्षेण निर्दिशेच्छ्रावणस्य सितम् । माघसितोद्भवा गर्भाः श्रावणकृष्णे प्रसूतिमायान्ति । माघस्य कृष्णपक्षेण निर्दिशेद्भाद्रपदशुक्लम् । फाल्गुनशुक्लसमुत्था भाद्रपदस्या सिते विनिर्देश्याः।तस्यैव कृष्णपक्षोद्भवास्तु ये तेऽश्वयुक्शुक्ले। चैत्रसितपक्षजाताः कृष्णेऽश्वयुजस्य वारिदा गर्भाः । चैत्रासितसम्भूताः कार्त्तिकशुक्लेऽभिवर्षन्ति" इति । "सप्तार्द्धगर्भा भुवनस्य रेतः" ऋ० १,१६४,३६ । "वत्-सरस्यार्द्धे गर्भस्थानीयमुदकं धारमाणाः" भा० । [हारभेदे

**अर्द्धगुच्छ** पु०। अर्द्धः चन्द्रसमः गुच्छः । १चतुर्विंशतिलतिके

**अर्द्धगुञ्जा** स्त्री अर्द्धं गुञ्जायाः । गुञ्जायास्तुल्यार्धपरिमाणे "तुल्या यवाभ्यां कथितात्र गुञ्जा" लीला० उक्तेः यव-द्वयार्द्धे एकयवरूपे तत्परिमाणे । तदर्हति ठञ् । उत्तर-पदस्य वृद्धिः पूर्व्वस्य वा ॥ अ(आ)र्द्ध गौञ्जिकः तत्परि-माणार्हे त्रि० । स्त्रियां ङीप् ।

**अर्द्धचन्द्र** पु० अर्द्धं चन्द्रस्य एक०त० । १चन्द्रस्यार्द्धे, तदाकारे-२नखक्षते, ३गलहस्ते, ४वाणभेदे, "रावणेन हृता सीता– अर्द्धचन्द्रार्द्धभास्करा" महाना० "सार्द्धचन्द्रं बिभर्त्ति यः" कुमा० "अर्द्धचन्द्रमुखैर्वाणैश्चिच्छेद कदलीसुखम्" रघुः "शृगालाः सर्व्वे गलेऽर्द्धचन्द्रं दत्त्वा निस्सारिताः"। "तद्दीयतां द्रागेतस्यार्द्धचन्द्रः" इति च पञ्च०त० । गल-हस्तस्तु तर्ज्जन्यङ्गुष्ठविस्ताररूपा हस्तसन्निवेशविशेष-मुद्रा । (तेओडोति) ख्यातायां ५त्रिवृति स्त्रीणां ६तिलक-भेदे च । स्त्री । स्वार्थे कन् । ह्रस्वे अतइत्त्वे । अर्द्धच-न्द्रिका १कर्णस्फोटलतायां २चित्रपर्ण्याञ्च ।

**अर्द्धचन्द्रक** पु० अर्द्धचन्द्र इव कायति कै–क । १मयूर-पिच्छस्यार्द्धचन्द्राकारे पदार्थे ।

**अर्द्धचन्द्राकृति** पु० अर्द्धचन्द्रस्याकृतिरिवाकृतिर्यस्य । गलहस्ते तर्ज्जन्यङ्गुष्ठविस्ताररूपे गले हस्तसन्निवेशविशेषे ।

**अर्द्धचोलक** न० अर्द्धं चोलस्य एकदेश त० संज्ञायां कन् । (काञ्चुलीति) ख्याते कुर्पासकवस्त्रे ।

**अर्धजरतीय** पु० अर्द्धं जरतीव इवार्थे कन् । अर्द्धवृद्धातुल्ये न्यायभेदे स च अर्द्धं कुक्कुट्याः पाकाय अर्द्धं प्रसवाय यथा न प्रभवति एवमेकभागस्यान्यपरत्वमन्यभागस्यान्यपरत्वं न युक्तमित्येवं परः न्यायः । "न च जानीमो विषयसन्ध्याया मिवान्तरालेऽवस्थानमर्द्धजरतीयकौशलम्" वृ० उ० भा० । यथा न जागर्त्ति न स्वपितीति विषयग्रहणमिति अन्त-रालेऽवस्थानं दुर्घटं यथा चार्द्धं कुक्कुट्याः पाकार्थमर्धञ्च प्रसवायेति कौशलं नोपलभ्यते" आ० गि०। जरत्या एव पाकः युवत्यास्तु प्रसवार्थत्वं नत्वेकस्या एव द्विविधकार्य्य करत्वमित्यर्थः "तुल्ययोर्निज्ञानार्थयोः प्रश्नप्रतिवचनयोः प्रकरणस्य विज्ञानार्थत्वादर्द्धजरतीयोन्यायो न युक्तः कल्पयितुम्" छा०भा० ।

**अर्द्धजाह्नवी** स्त्री अर्द्धगङ्गावत् । कावेर्य्यां नद्याम् ।

**अर्द्धतिक्त** अर्द्धः असम्पूर्णस्तिक्तः । नेपालनिम्बे । [त्मके काले ।

**अर्द्धदिन** अर्द्धं दिनस्य । दिनस्य तुल्यांऽशे सार्द्धसप्तमुहूर्त्ता